श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये तृतीयं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये तृतीयं दशकम् ॥

## भक्तस्वरूपवर्णनं भक्तिप्रार्थना च

पठन्तो नामानि प्रमदभरसिन्धौ निपतिताः
 स्मरन्तो रूपं ते वरद कथयन्तो गुणकथाः।
चरन्तो ये भक्तास्त्वयि खलु रमन्ते परममू -
 नहं धन्यान्मन्ये समधिगतसर्वाभिलषितान् ॥ 3.1 ॥

गदक्लिष्टं कष्टं तव चरणसेवारसभरे -
 ऽप्यनासक्तं चित्तं भवति बत विष्णो कुरु दयाम्।
भवत्पादाम्भोजस्मरणरसिको नामनिवहा -
 नहं गायं गायं कुहचन विवत्स्यामि विजने ॥ 3.2 ॥

कृपा ते जाता चेत् किमिव नहि लभ्यं तनुभृतां
 मदीयक्लेशौघप्रशमनदशा नाम कियती।
न के के लोकेऽस्मिन्ननिशमयि शोकाभिरहिता
 भवद्भक्ता मुक्ताः सुखगतिमसक्ता विदधते ॥ 3.3 ॥

मुनिप्रौढा रूढा जगति खलु गूढात्मगतयो
 भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः।
चरन्तीश स्वैरं सततपरिनिर्भातपरचि -
 त्सदानन्दाद्वैतप्रसरपरिमग्नाः किमपरम् ॥ 3.4 ॥

भवद्भक्तिः स्फीता भवतु मम सैव प्रशमये -
 दशेषक्लेशौघं न खलु हृदि सन्देहकणिका।

न चेद्व्यासस्योक्तिस्तव च वचनं नैगमवचो
    भवेन्मिथ्या रथ्यापुरुषवचनप्रायमखिलम्॥ **3.5** ॥

भवद्भक्तिस्तावत्प्रमुखमधुरा त्वद्गुणरसात्
    किमप्यारूढा चेदखिलपरितापप्रशमनी।
पुनश्चान्ते स्वान्ते विमलपरिबोधोदयमिल -
    न्महानन्दाद्वैतं दिशति किमतः प्रार्थ्यमपरम्॥ **3.6** ॥

विधूय क्लेशान् मे कुरु चरणयुग्मं धृतरसं
    भवत्क्षेत्रप्राप्तौ करमपि च ते पूजनविधौ।
भवन्मूर्त्यालोके नयनमथ ते पादतुलसी -
    परिघ्राणे घ्राणं श्रवणमपि ते चारुचरिते॥ **3.7** ॥

प्रभूताधिव्याधिप्रसभचलिते मामकहृदि
    त्वदीयं तद्रूपं परमसुखचिद्रूपमुदियात्।
उदञ्चद्रोमाञ्चो गलितबहुहर्षाश्रुनिवहो
    यथा विस्मर्यासं दुरुपशमपीडापरिभवान्॥ **3.8** ॥

मरुद्गेहाधीश त्वयि खलु पराञ्चोऽपि सुखिनो
    भवत्स्नेही सोऽहं सुबहु परितप्ये च किमिदम्।
अकीर्तिस्ते मा भूद्वरद गदभारं प्रशमयन्
    भवद्भक्तोत्तंसं झटिति कुरु मां कंसदमन॥ **3.9** ॥

किमुक्तैर्भूयोभिस्तव हि करुणा यावदुदिया -
    दहं तावद्देव प्रहितविविधार्तप्रलपितः।
पुरः क्लृप्ते पादे वरद तव नेष्यामि दिवसान्
    यथाशक्ति व्यक्तं नतिनुतिनिषेवा विरचयन्॥ **3.10** ॥

॥ इति श्रीमन्नारायणीये तृतीयं दशकं समाप्तम्॥